Click here to go back






## अथ बुध कवचं

ओं अस्य श्री बुध कवच महामंत्रस्य कात्यायन ऋषिः। अनुष्टुप् छंदः। बुधो देवता। यं बीजं। क्लीं शक्तिः। ऊं कीलकं। मम बुध ग्रहप्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) बां अंगुष्ठाभ्यां नमः। बीं तर्जनीभ्यां नमः। बूं मध्यमाभ्यां नमः।बैं अनामिकाभ्यां नमः। बौं कनिष्ठिकाभ्यां नमः। बः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) बां हृदयाय नमः। बीं शिरसे स्वाहा। बूं शिखायै वषट्। बैं कवचाय हुं। बौं नेत्रत्रयाय वौषट्। बः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) बुधः पुस्तकहस्तश्च कुंकुमस्य समद्युतिः। बुधः ज्ञानमयान् सर्वान् कुंकुमांक चतुर्भुजान्॥ खड्गशूलगदापाणिं वरदांकितमाद्दतं। पीतांबरधरं देवं पीतमाल्यानुलेपनं॥ वज्रमाभरणं चैव किरीट मकुटोज्वलं। श्वेताश्वरथमारूढं मेरुं चैव प्रदक्षिणं। पीतांबरधरः पातु पीतमाल्यानुलेपनं। बुधः पातु शिरोदेशं सौम्यं पातु च फालकं॥ नेत्रे ज्ञानमयः पातु शृतिं पातु शशीसुतः। घ्राणं गंधधरः पातु भुजौ पुस्तक भूषितः॥ मध्यं पातु सुराराध्यः पातु नाभिं खगेश्वरः। कटिं कालात्मजः पातु ऊरुं पातु सुरेश्वरः॥ जानुनी रोहिणीसूनुः पातु जंघे फलप्रदः। पादौ बाणासनः पातु पातु नौम्योखिलंवपुः॥ एतद्धि कवचं पुण्यं सर्वोपद्रव शांतिदं। सर्वरोगप्रशमनं सर्वरोगप्रशमनं सर्वदुःख निवारणं॥ आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्धनं। यः पठेत्कवचं दिव्यं शृणु यादृवा समाहितः। सर्वान्कामान् वाप्नोति दीर्घमायुश्च विदंति॥ इति श्री स्कांदपुराणेन उत्तरखंडे बुध कवचं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back